No. १३६७

Title न्यायकुसुमाञ्जलिः

Author उदयनाचार्यः १मः स्तवकः

Extent ~~१० पत्र~~ १ Age x

Subject न्यायवैशेषिकं

न्याय कुसुमाञ्जलि प्रथमस्तबकः

१२६८

१०८

इदं पुस्तकं पाठकोपनामक
स्यादयशंकरशर्मणः पण्डि
ति [redacted] २

कु०मू० प०१

१

॥ॐ नमो महागणपतये॥ श्रीनृसिंहाय॥ सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो विम्लानो न विमर्देनेमृतरस
प्रस्यंदमाध्वीकभूः। ईशस्यैष निवेशितः पदयुगे भृंगायमाणं भ्रमच्चेतो मे रमयत्वविघ्नमनघन्यायप्रसूनांजलिः १
स्वर्गापवर्गयोर्मार्गमामनंति मनीषिणः। यदुपास्तिमसावत्र परमात्मा निरूप्यते २ इह यद्यपि यं कमपि पुरुषार्थ
मर्थयमानाः शुद्धबुद्धस्वभाव इत्यौपनिषदाः। आदिविद्वान्सिद्ध इति कापिलाः। क्लेशकर्मविपाकाशयैरपरामृष्टो
निर्माणकायमधिष्ठाय संप्रदायप्रद्योतकोनुग्राहकश्चेति पातंजलाः। लोकवेदविरुद्धैरपि निर्लेपः स्वतंत्रश्चेति
महापाशुपताः। शिव इति शैवाः। पुरुषोत्तम इति वैष्णवाः। पितामह इति पौराणिकाः। यज्ञपुरुष इति याज्ञिकाः।
सर्वज्ञ इति सौगताः। निरावरण इति दिगंबराः। उपास्यत्वेन देशित इति मीमांसकाः। लोकव्यवहारसिद्ध इति चार्वा
काः। यावदुक्तोपपन्न इति नैयायिकाः। किं बहुना कारवोपि यं विश्वकर्मेत्युपासते। तस्मिन्नेवं जातिगोत्रप्रवरचर
णकुलधर्मादिवदासंसारं प्रसिद्धानुभावे भगवति भवसंदेह एव कुतः। किं निरूपणीयं। तथापि न्यायचर्चेयमीशस्य म राम
नन व्यपदेशभाक्। उपासनैव क्रियते श्रवणानंतरागता। श्रोतव्यो हि भगवान्बहुश्रुतिस्मृतीतिहासपुराणे १